# श्रीश्रीशिक्षाष्टकम्

## अनुवृत्ति सहितम्

हंस परिव्राजकाचार्य्य अष्टोत्तरशतश्री ॐ विष्णुपाद

**भक्तिसिद्धान्तसरस्वतीगोस्वामि-**

महाराज-विरचितम्

तानगर्य्यां १म संख्याक उल्टाडिङ्गि-जंसन-रोडस्थित

**श्रीगौड़ीयमठतः**

ीगौड़ीयमठरक्षक-आचार्य्यत्रिक श्रीकुञ्जविहारी

विद्याभूषणेन प्रकाशितम् ।

संस्करणम् ]　　　　[ भैक्ष्यमानकद्वयम्

SRI GAUDIYA MATH
Mathura, U. P.
श्रीश्रीगुरुगौराङ्गौ जयतः

# सानुवृत्तिशिक्षाष्टकम्

## चेतोदर्पणमार्जनं भवमहादावाग्निनिर्वापणं

अनन्तप्रकारासु साधनभक्तिषु श्रीमद्भागवते श्रीहरिभक्तिविलासे च भक्त्यङ्गानि बहुधा वर्णितानि। प्राधान्यतो भक्तिसाधने चतुःषष्टिविधानि भक्त्यङ्गानि वैधविचारेण तथा रागानुगविचारेण च कथ्यन्ते। श्रीमद्भागवते श्रीप्रह्लादोक्तावपि शुद्धभक्तेः समुल्लेखः समालक्ष्यते। श्रीमद्गौरसुन्दरेणाप्यभिहितं श्रीनामसङ्कीर्त्तनमेव निखिलेषु भक्त्यङ्गेषु प्रधानतममनुष्ठानमिति।

तत्त्वविदस्तु चिन्मात्रदर्शनेनाद्वयज्ञानं वस्तु "ब्रह्मेति", सच्चिद्वृत्तया तदेव "परमात्मे"ति, सच्चिदानन्दात्मिकया परिपूर्णदृष्ट्या च "भगवानि"ति निर्दिशन्ति। भगवत्तत्त्वमेवैश्वर्यदर्शनेन वासुदेवस्तथैश्वर्य्यशैथिल्य माधुर्य्यदृष्ट्या श्रीकृष्ण इति।

# श्रेयःकैरवचन्द्रिका-वितरणं विद्यावधूजीवनम् ।

श्रीमान्नारायणस्तु सार्द्ध द्वितयरसोपासनीयं वस्तु श्रीकृष्णस्तु रसपञ्चकस्यैव भजनीयधनं श्रीकृष्णादेव वैभवप्रकाशविग्रहस्य श्रीमद्बलदेवप्रभोर्महावैकुण्ठलीला-प्रकाशस्तत्र च नित्यकालं नित्यव्यूहचतुष्टयं विराजत इति ।

केवलेन मनसा मन्त्रजपो भवति, तदा खलु मननशीलो जपकृत् प्रयोजनसिद्धिं लभते, परन्त्वोष्ठस्पन्दनमात्रेणैव जपादप्यधिकफलदं कीर्त्तनं सिध्यति, कीर्त्तनाच्च श्रवणकर्त्तुः निजस्य च श्रेयः समागमो भवेत् ।

सङ्कीर्त्तनशब्देन सर्वतोभावेन कीर्त्तनमुच्यते, यस्मिन् कीर्त्तिते नान्येषां साधनाङ्गानामपेक्षा भवति । श्रीकृष्णविषयकमंशतः कीर्त्तनं नात्र सङ्कीर्त्तनशब्दस्य लक्षणीयं तादृश कीर्त्तनेन निखिलकल्याणसमागम-बिरहाद् बहव एव श्रीकृष्णकीर्त्तनस्य शक्तिमत्त्वे सन्दिहानाः सन्ति । श्रीकृष्णविषयकं सम्यक्कीर्त्तनमेव सर्वोपरि जयतादिति ।

# आनन्दाम्बुधिवर्द्धनं प्रतिपदं पूर्णामृतास्वादनं

विषयवार्त्तायाः कीर्त्तनेनांशतो भोगपरासिद्धि-सङ्गतिरप्राकृतराज्ये तु श्रीकृष्ण एव विषयस्तत्र च न कस्यचित् प्राकृतस्यावकाशलेशोऽपि प्रवर्त्तते। तस्मात् प्रकृतेरतीताः सर्वा एव सिद्धयः श्रीकृष्णसङ्कीर्त्तना-दासाद्यन्ते।

सर्वासु च सिद्धिषु सप्त विशेषसिद्धयः श्रीकृष्ण-सङ्कीर्त्तने संश्लिष्टतया विराजन्ते। ता एवात्रोदाहृता भवन्ति। श्रीकृष्णसङ्कीर्त्तनं जीवानां मालिन्यसंपृक्तस्य चित्तमुकुरस्य परिमार्जनकरम्, ईशवैमुख्यरूपोऽन्याभि-लाषः फलभोगः फलत्यागश्चैतत्त्रिविधैः प्राकृतमालिन्यै र्बद्धजीवानां चित्तं समावृतं भवति, तादृशचित्तदर्पणा-त्तत्परिमार्जने श्रीकृष्णसङ्कीर्त्तनमेव प्रधानतमं यन्त्र-मस्ति। जीवानां चित्तदर्पणे स्वरूपप्रतिफलनविधौ तान्येव त्रिविधानि कैतवावरणानि बाधकत्वेन प्रवर्त्तन्ते। परन्तु श्रीकृष्णसङ्कीर्त्तनमेव तदुद्घाटने प्रभवति। तस्मादेव जीवाः क्रमशश्चित्तदर्पणे स्वकीयं कृष्णकैङ्कर्य्य-मुपलब्धुं क्षमन्ते।

# सर्वात्मस्नपनं परं
# विजयते श्रीकृष्णसङ्कीर्त्तनम् ॥१॥

---

आपाततः सुमधुरोऽपि संसारोऽयं निबिड़काननान्तरचर-दावानलकल्पो भवति, दावाग्निना हि काननराजिता तरुराजिः प्रायश एव विनाशमेति। कृष्णविमुखजनश्च निरन्तरं दावानल-कल्प-संसारसन्तापमनुभवति। परन्तु श्रीकृष्णस्य सम्यक्कीर्त्तनमात्रेणैव संसारस्थितोऽपि स कृष्णोन्मुखतयैव दावदहनात् सद्य एव परित्रातो भवति। श्रीकृष्णस्य सम्यक्कीर्त्तनं हि परममङ्गलशोभां वितरति, यथा च चन्द्रमसः समुदयात् कुमुदानां शुभ्रत्वं विकसति, श्रीकृष्णसङ्कीर्त्तनाच्च तथैव 'निखिलकल्याणगणः समुदेति। अन्याभिलाषः कर्म्म ज्ञानञ्च न तावत् कल्याणकरं परं श्रीकृष्णसङ्कीर्तनमेव जीवानां परममङ्गलसन्तानकारणं भवति।

मुण्डकोपनिषदि द्वे च विद्ये समुद्दिष्टे लौकिकी परा चेति, श्रीकृष्णसङ्कीर्त्तनं गौणतः लौकिकविद्यावनिताया जीवनसममपि प्राधान्यादप्राकृतविद्यावधूजीवनमेव। श्रीकृष्णसङ्कीर्त्तनप्रभावाज्जीवा जागतिकविद्या-प्रसूतादहङ्काराद्विमुक्ताः कृष्णसम्बन्धज्ञानमा-

सादयन्ति। अप्राकृतविद्याया लक्ष्यं वस्त्वेव श्रीकृष्ण सङ्कीर्त्तनं भवति। तद्धि जीवानामप्राकृतानन्दाम्बुधि-परिवर्द्धनकरं, न हि खण्डितः सलिलाशयः समुद्र-शब्देन व्यपदिश्यते, तस्मादखण्ड एवानन्दराशिरसीम-समुद्रेणौपम्यं भजते। श्रीकृष्णसङ्कीर्त्तनं प्रतिपदमेव परिपूर्णामृतमास्वादयति, तस्मिन्नप्राकृते च रसास्वादने नाभावः प्रवर्त्तते, श्रीकृष्णसङ्कीर्त्तनादेव निरन्तरं परि-पूर्णनित्यरसास्वादनं सम्भवति। अप्राकृतमखिलमेव वस्तु श्रीकृष्णसङ्कीर्त्तनेन स्निग्धतामवगाहते, प्राकृते जगति शरीरं मनस्तदतीत आत्मा च तस्मान्न केवलं नैर्म्मल्यं परन्त्ववश्यम्भावितया स्निग्धतामपि प्रतिपद्यते। उपाधिभाजां जीवानाञ्च स्थूलसूक्ष्मतः सङ्गतानि सर्वा-ण्येव मालिन्यानि कीर्त्तनप्रभावाद् विधूयन्ते, व्यपगते च जड़ाभिनिवेशे कृष्णोन्मुखो जीवः सुशीतल-श्रीकृष्ण-पादपद्मसेवां लभते।

श्रीजीवगोस्वामिप्रभुणापि श्रीभागवतसन्दर्भान्यतम-श्रीभक्तिसन्दर्भे त्रिसप्तत्यधिकद्विशतसंख्यायां तथा श्रीमद्भागवतस्य सप्तमस्कन्धीय क्रमसन्दर्भे समभिहितम् —"अतएव यद्यप्यन्या भक्तिः कलौ कर्त्तव्या तदा कीर्त्तनाख्य भक्तिसंयोगेनैवे"ति ॥ १ ॥

# नाम्नामकारि बहुधा निजसर्वशक्ति-
# स्तत्रार्पिता नियमितः स्मरणे न कालः।

हे भगवन्! भवतैवाहैतुक्या कृपया नाम्नां बहु-संख्या प्रकटिता, तत्र च नामिनः सर्वविधा शक्तिरपि प्रणिहिता, श्रीनामस्मरणकालश्च न केनापि नियमेनाबद्धीकृतः। भोजने शयने निद्रायामपि नामस्मरणस्य न काचिद् बाधा विहिता, परं ममैतावद् दौर्भाग्यं यत् श्रीनामसमुदये न कश्चिदनुरागः समजनि। "बहुधा" पदेनात्र भगवतो मुख्यो गौणश्च नामराशिरुद्दिश्यते। माधुर्य्यविग्रहाश्रितानि कृष्णराधारमणगोपीजनवल्लभादीनि तथैश्वर्यविग्रहाश्रितानि वासुदेव-राम-नृसिंहादीनि मुख्यनामानि। भगवदभिन्नखण्डाविर्भावात्मक-ब्रह्म-परमात्मादि-नामराशिस्तु भगवतो गौणनामत्वेनाभिहितः। भगवतो मुख्यनामानि नामिनश्चाभिन्नानि, तेषु च सर्वाः शक्तयः एकत्र समावेशिताः, गौणनामराशौ च विविधाः शक्तयोऽंशतो वर्त्तन्ते।

जीव ईशवैमुख्यवशाद् विनश्वरे मायाजगति समाबद्धतया दुर्दैवं भजते। सेवावैमुख्यमेव दुर्दैवम्। अन्याभिलाषः कर्म्मज्ञानञ्चैतत्त्रिविधे भोगवर्त्मनि जीवस्य

**एतादृशी तव कृपा भगवन्ममापि**
**दुर्दैवमीदृशमिहाजनि नानुरागः ॥२॥**

---

स्वरूपविस्मृतौ तस्य दुर्विपाकश्च प्रादुर्भूतः । स चान्याभिलाषवशेनैहिक-सुखलाभे प्रमत्तो भवति । सत्कर्म्म-प्रभावेण क्षणभंगुरं स्वर्गादिकं कामयमानो भोगत्याग-वाञ्छया च निर्भेदब्रह्मानुसन्धानेऽसौ रज्यते । कृष्ण-सेवनेच्छा हि जीवस्य नित्यधर्म्मः, स च समुद्दिष्टत्रिविध-वर्त्ममालिन्यसंस्पर्शादावृत इति सौभाग्यक्षयस्तस्मात् स कदापि धर्म्मार्थकामाभिधवर्गत्रयसंग्रहे व्यग्रतया कदाचिद्-धर्म्मानर्थाकामैर्वा समाहततया दशापराधानामावाहन-पुरःसरं नामसेवायामपराद्धो भवति । तस्य खलु तदा-नीन्तनं नामग्रहणं न विशुद्धं परन्तु नामापराध एव । स्वकीयमशान्तभावमतिक्रम्य शान्तिलाभार्थं भुक्तिपिपा-सायाः परिचालनव्यतिरेकेण स यदा कल्याणाय सम्बन्ध-ज्ञानसमुदासीनो नामगृह्णाति तदा नामसेवायामाभास-मात्रोदयो भवति । नामाभासफलेन च प्रपञ्चज्ञानाद् विमुक्तः क्षणान्तरे हरिसेवायां योग्यत्वं लभते । बद्ध-जीवानां दुर्गतिं निरीक्षमाणः श्रीमान् गौरसुन्दरः श्रीनाम-भजनरीतिशिक्षणावसरे अनुरागाभावरूपं दुर्दैवं समुल्लि-

# तृणादपि सुनीचेन
# तरोरपि सहिष्णुना ।

लेख । परमीदृशे दुर्दैवेऽपि भगवत्कृपैव राजते, नामापराधादात्ममोचने उपायश्च विद्यते, अपराधस्वरूपज्ञानात्तदार्जनेपराङ्मुखस्य निरन्तरं नामग्राहिणो नामापराधावसरोभवति । नामाभासाद्विषयाभिनिवेशध्वंसरूपा मुक्तिस्ततश्च श्रीनामग्रहणे जीवस्याधिकारो भवति । मुख्यनामग्रहणकाले तस्यैकान्तिकमात्यन्तिकञ्च श्रेयः सिध्यति ।

यत्र हि हेयावान्तरफललाभाकांक्षा तत्रैव काल-योग्यतादीनां कठोरविधिः, परन्तु भगवत्कृपया कालाकालयोः कठोरबन्धनान्नामोच्चारिणः परित्राताः । कालविधिविषये श्रीचैतन्यभागवते—

"शयने भोजने जाग्रद्दशायाञ्च दिवानिशम् ।
कृष्णनाममहामन्त्रं वद जीव निरन्तरम् ॥"
"सर्वदा वद नामानि नास्तीह विधिरन्यथा ।"

श्रीचरितामृते च—

"भुञ्जानोऽथ शयानो वा गृह्णीयान्नाम सर्वदा ।
विधिर्न देशकालादेः सिद्धिः सर्वत्र सम्भवेत् ॥"२ ॥

जीवानां स्वरूपतः कृष्णदासत्वादिह स्वधाम्नि च

# अमानिना मानदेन
# कीर्त्तनीयः सदा हरिः ॥३॥

नित्यकालं हरिकीर्त्तनमेव परमो धर्म्मः, हरिकीर्त्तन इव नान्यत्र कस्मिंश्चिदुपाये उपेये वा स्वार्थसिद्धिः परोपकारश्च वर्त्तते। कीर्त्तनेन परार्थपरता स्वस्य च सकल कल्याणोदयो भवति। यथा हि श्रीनामग्रहणे नामापराधो नामाभासो वा नोदेति तथैव ज्ञापयितुं तृणादपीति श्लोकमवतारयति। यस्य हि चेतः कृष्णोन्मुखता-परिहारेण विषयभोगे समासज्जते तेन कदापि स्वस्य क्षुद्रत्वं नानुभवितुं शक्यते, भोक्तृधर्मे न क्षुद्रत्वोपलब्धिः सहनक्षमत्वं वा वर्त्तते। भोक्ता कदापि न जड़ाभिमानं तत्प्रतिष्ठां वा त्यक्तुं प्रभवति। विषयभोगपरः कदापि नेतरविषयिणे प्रतिष्ठामर्पयितुमीष्टे। स हि मत्सरो भवति, परन्तु नामभजनानन्दी वैष्णव एव तृणादपि सुनीचस्तरोरपि सहनशीलः स्वप्रतिष्ठायामुदास्ते, परेषाञ्च प्रतिष्ठार्पणे नियताभिलाषो भवति। स चेह निरन्तरं हरिनामकीर्त्तने सामर्थ्यञ्च भजते, श्रीशुद्ध-वैष्णवाश्च स्वेषां श्रीगुरुदेवे तथान्येषु च वैष्णवेषु निरन्तरं सम्मानज्ञापिकां प्रतिष्ठामारोपयन्ति, तद्धि

मानदधर्म्मस्यैव फलं परन्तु स्वानुगतानां भजनानुराग-वृद्धये समादरं गौरवस्नेहादि च यावत् प्रकटयन्ति तदपि च तेषाममानित्व-व्यञ्जकमात्रमेव भवति। ते च तादृशीं प्रतिष्ठां जड़त्वेनामन्यमाना मूर्खाणां कटाक्षबीक्षणं सहमाना अपि सहनक्षमत्वमात्मनः प्रकाशयन्ति। नामोच्चारणशीलः शुद्धभक्तो हि स्वात्मानं प्राकृतराज्ये निखिलप्राणिपदापीड़ितात् तृणादपि नीचैर्वर्त्तमानं सर्वतोहीनं जगतां शिष्यश्च विजानाति, न कदापि वैष्णवत्वेन गुरुत्वेन वा। प्रतिजीवं प्रतिपरमाणु कृष्णाधिष्ठानं मन्यमानः किमपि न स्वतः क्षुद्रतरं जानाति। कुतोऽपि न प्रार्थयति किञ्चित्, जिघांसन्तमपि क्षमते, परं तन्मङ्गलं कामयति, कदापि न गुरुदेवतः समागतां रीतिं परिहरन् नवीनमतवादप्रचारकामनया श्रीहरिनामकीर्त्तनव्यतिरेकेण काल्पनिक--नामावली--कल्पितां गाथां सृजति। श्रीगुरुदेवानुगत्या श्रीनाम-माहात्म्य-कीर्त्तनादि-प्रचारमुखेन ग्रन्थरचनेन कीर्त्तनेन च वैष्णवस्य सुनीचताव्याघातो न भवति।

कापट्येन लोकवञ्चनार्थमात्मनः सारल्याभावात् कपटदैन्यवचनं तादृग्व्यवहारश्च न सुनीचताप्रकटकरं भवति। महाभागवता हि कृष्णनामोच्चारणसमये

## न धनं न जनं न सुन्दरीं
## कवितां वा जगदीश कामये ।

स्थावरजङ्गमानां प्राकृतभोग्यमूर्त्तिनिवहमपश्यन्तः कृष्ण-कार्ष्णसेवोन्मुखतया जगदिदमवलोकयन्ति । भोग-प्रवृत्तिपारवश्येन न जगदात्मभोग्यत्वेन मन्यन्ते, मन्त्र-स्रष्टृत्वेन गुरुपरम्परापरिप्राप्तं महामन्त्रं न विजहति, नवीन मतप्रचारे च नानुरागं दधति । वैष्णव-गुरुत्वे-नात्मज्ञानं हि सुनीचतया व्याघातहेतुर्भवति । सत्कथा-श्रवण-परिहारेणार्थ-प्रतिष्ठालाभार्थमिन्द्रिय-तर्पणलिप्सया स्वस्वरूप-विस्मृतौ वैष्णवस्य गुरुपदाभिलाषिणो वा वदने न श्रीहरिनामकीर्त्तनं भवितुमर्हति । तादृक् कीर्त्तने श्रद्धालुः शिष्योऽपि हरिनामश्रवणे नाधिकारं भजते ॥३॥

हे जगदीश ! नाहमत्र धनं जनं सुन्दरीं वा कवितां कामये, मम तु प्रतिजन्म त्वमेव सेव्यत्वेन भवसि, त्वय्येव मे अहैतुकी भक्तिर्भवतु । अत्र "सुन्दरी कविता" शब्देन वेदबोधितो धर्म्मः, "धन" शब्देनार्थः "जन" शब्देन च कलत्रादिकामनीयविषयः समुद्दिष्टः । न केवलमहं धर्म्मार्थकामरूपासु भक्तिषु वीतरागः, परम-पुनर्भवरूपा मुक्तिरपि न मे कामनीया भवति, नाहमत्र

मम जन्मनि जन्मनीश्वरे
भवताद्भक्तिरहैतुकी त्वयि ॥४॥
अयि नन्दतनुज किङ्करं
पतितं मां विषमे भवाम्बुधौ ।

---

चतुर्वर्गकामनाप्रणोदितः सेवयामि भवन्तं परन्तु भवत्सेवाप्रवृत्तिरेव मां सेवने प्रयोजयति ।

धर्म्मकामो वेदनिष्ठः सवितारमाराधयति, गणपतिमर्थकामः शक्तिं कामकामो, रुद्रं मोक्षकामः सर्व एवैते सकामाः विष्णूपासकाश्च सुतरामेव विद्धभक्तपदभाजो भवन्ति । पञ्चविधमेतदुपासनं सकाममेव, निष्काम-भूमिकायां निर्गुणब्रह्मोपासकश्च सिद्धो भवति । परम-हैतुक-भक्त्यैव शुद्धविष्णोराराधनं जायते ॥ ४ ॥

भगवान् श्रीनन्दनन्दन एव सेवनीयं वस्तु, जीवस्य च नित्यस्वरूपं कृष्णदास्यमेव । स एव कृष्णदासो दास्यविधावौदासीन्याद्दुस्तरे भयङ्करे च संसारसिन्धौ निमज्जति । भगवत्कृपैवेदानीं केवलं तदवलम्बनम् । कृष्णस्तु यदा करुणया स्वकीय-चरणकमलधूलिकल्पत्वे-नाङ्गीकरोति तं तदेव तस्य समावृता नित्यवृत्तिः पुनः

कृपया तव पादपङ्कज-
स्थितधूलीसदृशं विचिन्तय ॥५॥
नयनं गलदश्रुधारया
वदनं गदगदरुद्धया गिरा ।

---

प्रकाशमेति । स्वीयप्रबलकामनावशेन कृष्णपादपद्मारोहणं न जीवधर्म्मः परन्तु कृष्णेच्छानुगत्या सेवाप्रवृत्तिमत्त्वमेव तात्पर्यम् । "पदधूलि" पदप्रयोगेण जीवस्य स्वरूपतो भगवद्विभिन्नांशत्वं प्रतिपादितम् ।

जीवस्य स्वरूपावस्थानात् पूर्वं यावदनर्थो विद्यते, तदा परमार्थप्रतीतेरनाविलता नास्ति । सम्बन्धज्ञानोद्गमेन प्रेमनामसङ्कीर्त्तनयोग्यता जायते, तदा स जातरतिरभिधीयते । अजातरतिसाधकजातरतिभावुकयोर्नामसङ्कीर्त्तने प्रभेदो वर्त्तते । कापट्येन नियतकालात् प्रागेव जातरतिभक्तस्य वेशकल्पनं नास्माकं समुचितम्, अनर्थनिवृत्तौ नैरन्तर्यं ततः स्वेच्छापूर्विका ततश्च स्वारसिकीति दशात्रयं तदूर्द्धञ्च प्रेमभूमिरिति ॥ ५ ॥

हे गोपीजनवल्लभ ! कदा त्वदीयनामग्रहणकाले मादृश गोपललनाया नयनयोरविरलमश्रुधारासमु-

# पुलकैर्निचितं वपुः कदा
# तव नामग्रहणे भविष्यति ॥६॥

देष्यति, वाक्यञ्च रुद्धतामेष्यति, शरीरं वा रोमाञ्चितं पुलकितञ्च भविष्यति ! इदं हि लालसाश्रित-विज्ञप्ते-र्निदर्शनम्—

"कदाहं यमुनातीरे नामानि तव कीर्त्तयन् ।
उद्बाष्पः पुण्डरीकाक्ष रचयिष्यामि ताण्डवम् ॥"

एतदप्यालोचनीयम् ।

गौणनामादौ न प्रेमनामसङ्कीर्त्तनावकाशो भवति, अतएव श्रीमद्गौरसुन्दरेणाभिहितम्—

"श्रुतमप्यौपनिषदं दूरे हरिकथामृतात् ।
यन्न सन्ति द्रवच्चित्त-कम्पाश्रुपुलकादयः ॥"

औपनिषदं ब्रह्म हि हरिकथामृत-प्रसङ्गात् सुदूरं स्थितम् । यत्र हरिकथा वर्त्तते तत्र हि चित्तस्य द्रवत्वं कम्पाश्रुपुलकादयश्च परिलक्ष्यन्ते ।

अत्र तु चक्षुषोर्निसर्ग द्रवत्वं भावाभासप्रियाणां बिकारा वा नोद्दिष्टाः, परन्तु शुद्धस्य जीवात्मनः कृष्ण-सेवोन्मुखतायामेवानुकूलं मनः स्थूलान्यङ्गप्रत्यङ्गानि च नित्यभावस्य प्रातिकूल्यायन कल्पन्ते । सुतरामनर्थ-

# युगायितं निमेषेण चक्षुषा प्रावृषायितम् ।

मुक्ते शुद्धभगवद्भक्ते चित्तद्रवत्वं सात्त्विक आङ्गिकश्च विकार राशिर्लक्ष्यते । ये तु कोमलश्रद्धजना महाभागवतानुकृत्या कृत्रिमं सात्त्विकविकारादि प्रकटयन्तो लोकवञ्चनां विदधति, तेषां तादृगनुष्ठानं शुद्धभक्तेर्विरोध कारणं भवति ॥ ६ ॥

हे गोविन्द ! त्वद्विरहेण निखिलं जगत् शून्यमवबुध्यते, नयनयुगलं वार्षिकवारिधारयेवाश्रुधारया परिप्लुततामेति, नेत्रपत्रस्य पतनकालश्च युगकल्पः प्रतीयते । अयं हि विप्रलम्भरसस्य प्रकृष्टं निदर्शनम् । जातरतिभक्तानां सम्भोगाद्विप्रलम्भस्य प्रयोजनत्वमधिकतरमित्यवबोधयितुं श्लोकोऽयमवतारितः ।

प्राकृते विप्रलम्भरसे केवलं दुःखमेवावस्थितमप्राकृते तु बहिर्दुःखमयमप्यभ्यन्तरं परमानन्दपरिपूर्णतया विराजते । विप्रलम्भः सम्भोगस्य परिपोषकश्च भवति । परञ्च तत्र प्रेमवैचित्र्याख्यायां भूमिकायां बहिर्दर्शनतः सम्भोग एव राजते । विप्रलम्भकाले श्रीकृष्णस्य स्मरणप्राचुर्यात् श्रीहरिविस्मृतेरवकाशो नास्ति । इयमेव भजनपराकाष्ठा ।

शून्यायितं जगत्सर्वं
गोविन्दविरहेण मे ॥७॥
आश्लिष्य वा पादरतां पिनष्टु मा-
मदर्शनान्मर्महतां करोतु वा ।

---

कृष्णविमुखे गौरनागरमतवादप्रचारकवृन्दे यत्सम्भोगरसस्य प्राबल्यं परिलक्ष्यते, तद्धि कृष्णवैमुख्यवशाद्-प्राकृतरसस्य बाधकमेव । सम्भोगवादिनस्तु स्वात्मेन्द्रियप्रीतिचेष्टापरत्वात् कृष्णभक्तिरहिताः भवन्ति । कृष्णेन्द्रियप्रीतिवाञ्छैव प्रेमेति विदिते स्वीय सम्भोगरसस्य ताड़नया नासौ श्रीगौराङ्गं नागरत्वेन कल्पयितुं प्रधावति । श्रीगौराङ्गलीलाया इदमेव रहस्यं यत् श्रीकृष्णः स्वयमाश्रयजातीयभावालम्बनान्निरन्तरं विप्रलम्भरसाधिष्ठितो वर्त्तते । सम्भोगरसस्य पोषणकल्पेनैवाश्रयजातीयजीवस्य पूर्णविकासपराकाष्ठा विप्रलम्भ एव स्थितेति प्रदर्शयितुं श्रीकृष्णो विप्रलम्भरसावतारं नित्यं श्रीगौरस्वरूपं प्रकटयामास । तत्र न सम्भोग वादिनां हेयचेष्टा फलाय भवितुमर्हति ॥ ७ ॥

अहं पादपद्मसेवनरताया गोपललनायाः किङ्करी ।

# यथा तथा वा विदधातु लम्पटो
# मत्प्राणनाथस्तु स एव नापरः ॥८॥

---

मामालिङ्गनेनात्मसात् करोतु किंवादर्शनान्मर्म्माहतां करोतु, तस्य हि गोपवधूविटस्य लम्पटस्य यथेच्छा तथैव भवतु। तथापि स एव मम प्राणनाथो नान्यः कश्चिद्भवति। श्रीकृष्णस्तु स्वतन्त्रः परमपुरुषः, तदनुगमनमेव ममानन्यो धर्म्मः। नाहं स्वेच्छाचारिणी तदभिलाषप्रातिकूल्येन कियतीमपि सेवाप्रवृत्तिं प्रदर्शयितुं प्रभवामि।

जीवस्य सिद्धौ हि स्थूलदेहमनसी इत्युपाधिद्वयं न वर्त्तते। तदा हि मधुररसे नन्दनन्दनस्य स्वेच्छाविहारक्षेत्रे अप्राकृतवृन्दावनधामनि व्रजललनायाः सहचरीत्वेन सिद्धदेहस्थितेनाप्राकृतेन्द्रियगणेन केवलं कृष्णेच्छापरिपूरणमेव प्रेमभक्तिस्वरूपम्। जीवः कदापि स्वात्मानमाश्रयविग्रहत्वेन न मन्येत, तेनाप्यहंग्रहोपासना भवति। आश्रयजातीयस्यानुगमनमेव शुद्धजीवात्मनो निर्म्मलमवस्थानम्। जीवस्य कृष्णप्रियत्वेऽपि तत्संस्थाने कृष्णाभिलाषक्रमेण विभिन्नांशाः संश्लिष्टा वर्त्तन्ते॥८॥

शिक्षाष्टकस्य श्लोकैरष्टभिरेवाभिधेयकीर्त्तनमुखेन सम्बन्धाभिधेय प्रयोजनतत्त्वानि प्रदर्शितानि। प्रथमे

सामान्यतः श्रीकृष्णसङ्कीर्त्तनरूपं साधनं, द्वितीये तादृक् श्रेष्ठसाधने स्वस्याक्षमत्वोपलब्धिः, तृतीये श्रीनामग्रहण-प्रणाली, चतुर्थे प्रतिकूलबाञ्छा कैतवयोर्वर्जनं, पञ्चमे स्वरूपज्ञानं, षष्ठे कृष्णसान्निध्यादात्मनः सौभाग्यवर्णनं, सप्तमे उन्नताधिकारे विप्रलम्भरसवर्णनं, अष्टमे च स्व-प्रयोजनसिद्धेरुद्देश इति। प्रथमतः पञ्चस्वभिधेयमूला सम्बन्धज्ञानशिक्षा, अष्टस्वेवाभिधेयमन्त्यश्लोकत्रये प्रयो-जनविषयिणी शिक्षा, प्रथमतः पञ्चस्वभिधेयविचारे साधनभक्तिरन्त्ययोर्भावभक्तिः, षष्ठतोऽष्टमं यावद्वैशिष्ट्या त्सप्तमाष्टमयोः साध्या प्रेमभक्तिः परिस्फुरितेति।

इति सानुवृत्ति शिक्षाष्टकम्

SRI GAUDIYA MATH
Bhagbazar...ghat,
...

कलिकाता नगर्य्यां २४३।२ संख्यक अपार सार्कु
रोड्स्थित गौड़ीय प्रिण्टिं वैद्युतिकमुद्रायन्त्रे
श्रीअनन्तवासुदेव ब्रह्मचारिणा मुद्रितम्।